# শ্রীশিবসহস্রনামস্তোত্রম্ ১

{॥ শ্রীশিবসহস্রনামস্তোত্রম্ ১ ॥}

॥ অথ শ্রী শিব সহস্রনাম স্তোত্রম্ ॥

ওঁ স্থিরঃ স্থাণুঃ প্রভুর্ভীমঃ প্রবরো বরদো বরঃ ।

সর্বাত্মা সর্ববিখ্যাতঃ সর্বঃ সর্বকরো ভবঃ ॥ ১॥

জটী চর্মী শিখণ্ডী চ সর্বাংগঃ সর্বভাবনঃ ।

হরশ্চ হরিণাক্ষশ্চ সর্বভূতহরঃ প্রভুঃ ॥ ২॥

প্রবৃত্তিশ্চ নিবৃত্তিশ্চ নিযতঃ শাশ্বতো ধ্রুবঃ ।

শ্মশানবাসী ভগবান্ খচরো গোচরোঽর্দনঃ ॥ ৩॥

অভিবাদ্যো মহাকর্মা তপস্বী ভূতভাবনঃ ।

উন্মত্তবেষপ্রচ্ছন্নঃ সর্বলোকপ্রজাপতিঃ ॥ ৪॥

মহারূপো মহাকাযো বৃষরূপো মহাযশাঃ ।

মহাত্মা সর্বভূতাত্মা বিশ্বরূপো মহাহনুঃ ॥ ৫॥

লোকপালোঽন্তর্হিতাত্মা প্রসাদো হযগর্দভিঃ ।

পবিত্রং চ মহাংশ্চৈব নিযমো নিযমাশ্রিতঃ ॥ ৬॥

Stotram Digitalized By Sanskritdocuments.org

সর্বকর্মা স্বযংভূত আদিরাদিকরো নিধিঃ ।

সহস্রাক্ষো বিশালাক্ষঃ সোমো নক্ষত্রসাধকঃ ॥ ৭॥

চন্দ্রঃ সূর্যঃ শনিঃ কেতুর্গ্রহো গ্রহপতির্বরঃ ।

অত্রিরত্র্যানমস্কর্তা মৃগবাণার্পণোঽনঘঃ ॥ ৮॥

মহাতপা ঘোরতপা অদীনো দীনসাধকঃ ।

সংবৎসরকরো মন্ত্রঃ প্রমাণং পরমং তপঃ ॥ ৯॥

যোগী যোজ্যো মহাবীজো মহারেতা মহাবলঃ ।

সুবর্ণরেতাঃ সর্বজ্ঞঃ সুবীজো বীজবাহনঃ ॥ ১০॥

দশবাহুস্ত্বনিমিষো নীলকণ্ঠ উমাপতিঃ ।

বিশ্বরূপঃ স্বযংশ্রেষ্ঠো বলবীরোঽবলো গণঃ ॥ ১১॥

গণকর্তা গণপতির্দিগ্বাসাঃ কাম এব চ ।

মন্ত্রবিৎপরমোমন্ত্রঃ সর্বভাবকরো হরঃ ॥ ১২॥

কমণ্ডলুধরো ধন্বী বাণহস্তঃ কপালবান্ ।

অশনী শতঘ্নী খড্গী পট্টিশী চাযুধী মহান্ ॥ ১৩॥

স্রুবহস্তঃ সুরূপশ্চ তেজস্তেজস্করো নিধিঃ ।

উষ্ণিষী চ সুবক্ত্রশ্চ উদগ্রো বিনতস্তথা ॥ ১৪॥

দীর্ঘশ্চ হরিকেশশ্চ সুতীর্থঃ কৃষ্ণ এব চ ।

সৃগালরূপঃ সিদ্ধার্থো মুণ্ডঃ সর্বশুভংকরঃ ॥ ১৫॥

অজশ্চ বহুরূপশ্চ গন্ধধারী কপর্দ্যপি ।

ঊর্ধ্বরেতা ঊর্ধ্বলিংগ ঊর্ধ্বশায়ী নভঃস্থলঃ ॥ ১৬॥

ত্রিজটী চীরবাসাশ্চ রুদ্রঃ সেনাপতির্বিভুঃ ।

অহশ্চরোনক্তংচরস্তিগ্মমন্যুঃ সুবর্চসঃ ॥ ১৭॥

গজহা দৈত্যহা কালো লোকধাতা গুণাকরঃ ।

সিংহশার্দূলরূপশ্চ আর্দ্রচর্মাম্বরাবৃতঃ ॥ ১৮॥

কালযোগী মহানাদঃ সর্বকামশ্চতুষ্পথঃ ।

নিশাচরঃ প্রেতচারী ভূতচারী মহেশ্বরঃ ॥ ১৯॥

বহুভূতো বহুধরঃ স্বর্ভানুরমিতো গতিঃ ।

নৃত্যপ্রিয়ো নিত্যনর্তো নর্তকঃ সর্বলালসঃ ॥ ২০॥

ঘোরো মহাতপাঃ পাশো নিত্যো গিরিরুহো নভঃ ।

সহস্রহস্তো বিজয়ো ব্যবসায়ো হ্যতন্দ্রিতঃ ॥ ২১॥

অধর্ষণো ধর্ষণাত্মা যজ্ঞহা কামনাশকঃ ।

দক্ষযাগাপহারী চ সুসহো মধ্যমস্তথা ॥ ২২॥

তেজোপহারী বলহা মুদিতোঽর্থোঽজিতো বরঃ ।

গম্ভীরঘোষো গম্ভীরো গম্ভীরবলবাহনঃ ॥ ২৩॥

ন্যগ্রোধরূপো ন্যগ্রোধো বৃক্ষকর্ণস্থিতির্বিভুঃ ।

সুতীক্ষ্ণদশনশ্চৈব মহাকায়ো মহাননঃ ॥ ২৪॥

বিষ্বক্সেনো হরির্যজ্ঞঃ সংযুগাপীডবাহনঃ ।

তীক্ষ্ণতাপশ্চ হর্যশ্বঃ সহায়ঃ কর্মকালবিত্ ॥ ২৫॥

বিষ্ণুপ্রসাদিতো যজ্ঞঃ সমুদ্রো বডবামুখঃ ।

হুতাশনসহায়শ্চ প্রশান্তাত্মা হুতাশনঃ ॥ ২৬॥

উগ্রতেজা মহাতেজা জন্যো বিজয়কালবিত্ ।

জ্যোতিষাময়নং সিদ্ধিঃ সর্ববিগ্রহ এব চ ॥ ২৭॥

শিখী মুণ্ডী জটী জ্বালী মূর্তিজো মূর্ধগো বলী ।

বৈণবী পণবী তালী খলী কালকটংকটঃ ॥ ২৮॥

নক্ষত্রবিগ্রহমতির্গুণবুদ্ধির্লয়োঽগমঃ ।

প্রজাপতির্বিশ্ববাহুর্বিভাগঃ সর্বগোঽমুখঃ ॥ ২৯॥

বিমোচনঃ সুসরণো হিরণ্যকবচোদ্ভবঃ ।
মেঢ্রজো বলচারী চ মহীচারী স্রুতস্তথা ॥ ৩০॥

সর্বতূর্যবিনোদী চ সর্বাতোদ্যপরিগ্রহঃ ।
ব্যালরূপো গুহাবাসী গুহো মালী তরংগবিত্ ॥ ৩১॥

ত্রিদশস্ত্রিকালধৃক্কর্মসর্ববন্ধবিমোচনঃ ।
বন্ধনস্ত্বসুরেন্দ্রাণাং যুধিশত্রুবিনাশনঃ ॥ ৩২॥

সাংখ্যপ্রসাদো দুর্বাসাঃ সর্বসাধুনিষেবিতঃ ।
প্রস্কন্দনো বিভাগজ্ঞো অতুল্যো যজ্ঞভাগবিত্ ॥ ৩৩॥

সর্ববাসঃ সর্বচারী দুর্বাসা বাসবোঽমরঃ ।
হৈমো হেমকরো যজ্ঞঃ সর্বধারী ধরোত্তমঃ ॥ ৩৪॥

লোহিতাক্ষো মহাক্ষশ্চ বিজযাক্ষো বিশারদঃ ।
সংগ্রহো নিগ্রহঃ কর্তা সর্পচীরনিবাসনঃ ॥ ৩৫॥

মুখ্যোঽমুখ্যশ্চ দেহশ্চ কাহলিঃ সর্বকামদঃ ।
সর্বকালপ্রসাদশ্চ সুবলো বলরূপধৃত্ ॥ ৩৬॥

সর্বকামবরশ্চৈব সর্বদঃ সর্বতোমুখঃ ।

আকাশনির্বিরূপশ্চ নিপাতী হ্যবশঃ খগঃ ॥ ৩৭॥

রৌদ্ররূপোঽংশুরাদিত্যো বহুরশ্মিঃ সুবর্চসী ।

বসুবেগো মহাবেগো মনোবেগো নিশাচরঃ ॥ ৩৮॥

সর্ববাসী শ্রিযাবাসী উপদেশকরোঽকরঃ ।

মুনিরাত্মনিরালোকঃ সংভগ্নশ্চ সহস্রদঃ ॥ ৩৯॥

পক্ষী চ পক্ষরূপশ্চ অতিদীপ্তো বিশাম্পতিঃ ।

উন্মাদো মদনঃ কামো হ্যশ্বত্থোঽর্থকরো যশঃ ॥ ৪০॥

বামদেবশ্চ বামশ্চ প্রাগ্দক্ষিণশ্চ বামনঃ ।

সিদ্ধযোগী মহর্ষিশ্চ সিদ্ধার্থঃ সিদ্ধসাধকঃ ॥ ৪১॥

ভিক্ষুশ্চ ভিক্ষুরূপশ্চ বিপণো মৃদুরব্যযঃ ।

মহাসেনো বিশাখশ্চ ষষ্ঠিভাগো গবাংপতিঃ ॥ ৪২॥

বজ্রহস্তশ্চ বিষ্কম্ভী চমূস্তম্ভন এব চ ।

বৃত্তাবৃত্তকরস্তালো মধুর্মধুকলোচনঃ ॥ ৪৩॥

বাচস্পত্যো বাজসনো নিত্যমাশ্রিতপূজিতঃ ।

ব্রহ্মচারী লোকচারী সর্বচারী বিচারবিত্ ॥ ৪৪॥

ঈশান ঈশ্বরঃ কালো নিশাচারী পিনাকবান্ ।
নিমিত্তস্থো নিমিত্তং চ নন্দির্নন্দিকরো হরিঃ ॥ ৪৫॥

নন্দীশ্বরশ্চ নন্দী চ নন্দনো নন্দিবর্ধনঃ ।
ভগহারী নিহন্তা চ কালো ব্রহ্মা পিতামহঃ ॥ ৪৬॥

চতুর্মুখো মহালিংগশ্চারুলিংগস্তথৈব চ ।
লিংগাধ্যক্ষঃ সুরাধ্যক্ষো যোগাধ্যক্ষো যুগাবহঃ ॥ ৪৭॥

বীজাধ্যক্ষো বীজকর্তা অধ্যাত্মাঽনুগতো বলঃ ।
ইতিহাসঃ সকল্পশ্চ গৌতমোঽথ নিশাকরঃ ॥ ৪৮॥

দম্ভো হ্যদম্ভো বৈদম্ভো বশ্যো বশকরঃ কলিঃ ।
লোককর্তা পশুপতির্মহাকর্তা হ্যনৌষধঃ ॥ ৪৯॥

অক্ষরং পরমং ব্রহ্ম বলবচ্ছক্র এব চ ।
নীতির্হ্যনীতিঃ শুদ্ধাত্মা শুদ্ধো মান্যো গতাগতঃ ॥ ৫০॥

বহুপ্রসাদঃ সুস্বপ্নো দর্পণোঽথ ত্বমিত্রজিত্ ।
বেদকারো মন্ত্রকারো বিদ্বান্ সমরমর্দনঃ ॥ ৫১॥

মহামেঘনিবাসী চ মহাঘোরো বশীকরঃ ।
অগ্নিজ্বালো মহাজ্বালো অতিধূম্রো হুতো হবিঃ ॥ ৫২॥

বৃষণঃ শংকরো নিত্যংবর্চস্বী ধূমকেতনঃ ।
নীলস্তথাংগলুব্ধশ্চ শোভনো নিরবগ্রহঃ ॥ ৫৩॥

স্বস্তিদঃ স্বস্তিভাবশ্চ ভাগী ভাগকরো লঘুঃ ।
উৎসংগশ্চ মহাংগশ্চ মহাগর্ভপরায়ণঃ ॥ ৫৪॥

কৃষ্ণবর্ণঃ সুবর্ণশ্চ ইন্দ্রিয়ং সর্বদেহিনাম্ ।
মহাপাদো মহাহস্তো মহাকায়ো মহাযশাঃ ॥ ৫৫॥

মহামূর্ধা মহামাত্রো মহানেত্রো নিশালয়ঃ ।
মহান্তকো মহাকর্ণো মহোষ্ঠশ্চ মহাহনুঃ ॥ ৫৬॥

মহানাসো মহাকম্বুর্মহাগ্রীবঃ শ্মশানভাক্ ।
মহাবক্ষা মহোরস্কো হ্যন্তরাত্মা মৃগালয়ঃ ॥ ৫৭॥

লম্বনো লম্বিতোষ্ঠশ্চ মহামায়ঃ পয়োনিধিঃ ।
মহাদন্তো মহাদংষ্ট্রো মহাজিহ্বো মহামুখঃ ॥ ৫৮॥

মহানখো মহারোমো মহাকোশো মহাজটঃ ।

প্রসন্নশ্চ প্রসাদশ্চ প্রত্যযো গিরিসাধনঃ ॥ ৫৯॥

স্নেহনোঽস্নেহনশ্চৈব অজিতশ্চ মহামুনিঃ ।
বৃক্ষাকারো বৃক্ষকেতুরনলো বাযুবাহনঃ ॥ ৬০॥

গণ্ডলী মেরুধামা চ দেবাধিপতিরেব চ ।
অথর্বশীর্ষঃ সামাস্য ঋক্সহস্রামিতেক্ষণঃ ॥ ৬১॥

যজুঃ পাদভুজো গুহ্যঃ প্রকাশো জংগমস্তথা ।
অমোঘার্থঃ প্রসাদশ্চ অভিগম্যঃ সুদর্শনঃ ॥ ৬২॥

উপকারঃ প্রিযঃ সর্বঃ কনকঃ কাংচনচ্ছবিঃ ।
নাভির্নন্দিকরো ভাবঃ পুষ্করঃ স্থপতিঃ স্থিরঃ ॥ ৬৩॥

দ্বাদশস্ত্রাসনশ্চাদ্যো যজ্ঞো যজ্ঞসমাহিতঃ ।
নক্তং কলিশ্চ কালশ্চ মকরঃ কালপূজিতঃ ॥ ৬৪॥

সগণো গণকারশ্চ ভূতবাহনসারথিঃ ।
ভস্মশযো ভস্মগোপ্তা ভস্মভূতস্তরুর্গণঃ ॥ ৬৫॥

লোকপালস্তথা লোকো মহাত্মা সর্বপূজিতঃ ।
শুক্লস্ত্রিশুক্লঃ সংপন্নঃ শুচির্ভূতনিষেবিতঃ ॥ ৬৬॥

আশ্রমস্থঃ ক্রিযাবস্থো বিশ্বকর্মমতির্বরঃ ।
বিশালশাখস্তাম্রোষ্ঠো হ্যম্বুজালঃ সুনিশ্চলঃ ॥ ৬৭॥

কপিলঃ কপিশঃ শুক্ল আযুশ্চৈব পরোঽপরঃ ।
গন্ধর্বো হ্যদিতিস্তার্ক্ষ্যঃ সুবিজ্ঞেযঃ সুশারদঃ ॥ ৬৮॥

পরশ্বধাযুধো দেব অনুকারী সুবান্ধবঃ ।
তুম্ববীণো মহাক্রোধ ঊর্ধ্বরেতা জলেশযঃ ॥ ৬৯॥

উগ্রো বংশকরো বংশো বংশনাদো হ্যনিন্দিতঃ ।
সর্বাংগরূপো মাযাবী সুহৃদো হ্যনিলোঽনলঃ ॥ ৭০॥

বন্ধনো বন্ধকর্তা চ সুবন্ধনবিমোচনঃ ।
সযজ্ঞারিঃ সকামারির্মহাদংষ্ট্রো মহাযুধঃ ॥ ৭১॥

বহুধা নিন্দিতঃ শর্বঃ শংকরঃ শংকরোঽধনঃ ।
অমরেশো মহাদেবো বিশ্বদেবঃ সুরারিহা ॥ ৭২॥

অহির্বুধ্ন্যোঽনিলাভশ্চ চেকিতানো হবিস্তথা ।
অজৈকপাচ্চ কাপালী ত্রিশংকুরজিতঃ শিবঃ ॥ ৭৩॥

ধন্বন্তরির্ধূমকেতুঃ স্কন্দো বৈশ্রবণস্তথা ।

ধাতা শক্রশ্চ বিষ্ণুশ্চ মিত্রস্ত্বষ্টা ধ্রুবো ধরঃ ॥ ৭৪॥

প্রভাবঃ সর্বগো বায়ুরর্যমা সবিতা রবিঃ ।

উষংগুশ্চ বিধাতা চ মান্ধাতা ভূতভাবনঃ ॥ ৭৫॥

বিভুর্বর্ণবিভাবী চ সর্বকামগুণাবহঃ ।

পদ্মনাভো মহাগর্ভশ্চন্দ্রবক্ত্রোঽনিলোঽনলঃ ॥ ৭৬॥

বলবাংশ্চোপশান্তশ্চ পুরাণঃ পুণ্যচংচুরী ।

কুরুকর্তা কুরুবাসী কুরুভূতো গুণৌষধঃ ॥ ৭৭॥

সর্বাশযো দর্ভচারী সর্বেষাং প্রাণিনাংপতিঃ ।

দেবদেবঃ সুখাসক্তঃ সদসত্ সর্বরত্নবিত্ ॥ ৭৮॥

কৈলাসগিরিবাসী চ হিমবদ্গিরিসংশ্রযঃ ।

কূলহারী কূলকর্তা বহুবিদ্যো বহুপ্রদঃ ॥ ৭৯॥

বণিজো বর্ধকী বৃক্ষো বকুলশ্চন্দনশ্ছদঃ ।

সারগ্রীবো মহাজত্রু রলোলশ্চ মহৌষধঃ ॥ ৮০॥

সিদ্ধার্থকারী সিদ্ধার্থশ্ছন্দোব্যাকরণোত্তরঃ ।

সিংহনাদঃ সিংহদংষ্ট্রঃ সিংহগঃ সিংহবাহনঃ ॥ ৮১॥

প্রভাবাত্মা জগৎকালস্থালো লোকহিতস্তরুঃ ।

সারংগো নবচক্রাংগঃ কেতুমালী সভাবনঃ ॥ ৮২ ॥

ভূতালযো ভূতপতিরহোরাত্রমনিন্দিতঃ ॥ ৮৩॥

বাহিতা সর্বভূতানাং নিলযশ্চ বিভুর্ভবঃ ।

অমোঘঃ সংযতো হ্যশ্বো ভোজনঃ প্রাণধারণঃ ॥ ৮৪ ॥

ধৃতিমান্ মতিমান্ দক্ষঃ সৎকৃতশ্চ যুগাধিপঃ ।

গোপালির্গোপতিগ্রামো গোচর্মবসনো হরিঃ ॥ ৮৫ ॥

হিরণ্যবাহুশ্চ তথা গুহাপালঃ প্রবেশিনাম্ ।

প্রকৃষ্টারির্মহাহর্ষো জিতকামো জিতেন্দ্রিযঃ ॥ ৮৬॥

গান্ধারশ্চ সুবাসশ্চ তপঃসক্তো রতির্নরঃ ।

মহাগীতো মহানৃত্যো হ্যপ্সরোগণসেবিতঃ ॥ ৮৭ ॥

মহাকেতুর্মহাধাতুর্নৈকসানুচরশ্চলঃ ।

আবেদনীয আদেশঃ সর্বগন্ধসুখাবহঃ ॥ ৮৮ ॥

তোরণস্তারণো বাতঃ পরিধী পতিখেচরঃ ।

সংযোগো বর্ধনো বৃদ্ধো অতিবৃদ্ধো গুণাধিকঃ ॥ ৮৯ ॥

নিত্যমাত্মসহায়শ্চ দেবাসুরপতিঃ পতিঃ ।

যুক্তশ্চ যুক্তবাহুশ্চ দেবো দিবি সুপর্বণঃ ॥ ৯০॥

আষাঢশ্চ সুষাঢশ্চ ধ্রুবোঽথ হরিণো হরঃ ।

বপুরাবর্তমানেভ্যো বসুশ্রেষ্ঠো মহাপথঃ ॥ ৯১॥

শিরোহারী বিমর্শশ্চ সর্বলক্ষণলক্ষিতঃ ।

অক্ষশ্চ রথযোগী চ সর্বযোগী মহাবলঃ ॥ ৯২॥

সমাম্নায়োঽসমাম্নায়স্তীর্থদেবো মহারথঃ ।

নির্জীবো জীবনো মন্ত্রঃ শুভাক্ষো বহুকর্কশঃ ॥ ৯৩॥

রত্নপ্রভূতো রক্তাঙ্গো মহার্ণবনিপানবিত্ ।

মূলং বিশালো হ্যমৃতো ব্যক্তাব্যক্তস্তপোনিধিঃ ॥ ৯৪॥

আরোহণোঽধিরোহশ্চ শীলধারী মহাযশাঃ ।

সেনাকল্পো মহাকল্পো যোগো যুগকরো হরিঃ ॥ ৯৫॥

যুগরূপো মহারূপো মহানাগহনো বধঃ ।

ন্যায়নির্বপণঃ পাদঃ পণ্ডিতো হ্যচলোপমঃ ॥ ৯৬॥

বহুমালো মহামালঃ শশী হরসুলোচনঃ ।

বিস্তারো লবণঃ কূপস্ত্রিযুগঃ সফলোদযঃ ॥ ৯৭॥

ত্রিলোচনো বিষণ্ণাংগো মণিবিদ্ধো জটাধরঃ ।

বিন্দুর্বিসর্গঃ সুমুখঃ শরঃ সর্বাযুধঃ সহঃ ॥ ৯৮॥

নিবেদনঃ সুখাজাতঃ সুগন্ধারো মহাধনুঃ ।

গন্ধপালী চ ভগবানুত্থানঃ সর্বকর্মণাম্ ॥ ৯৯॥

মন্থানো বহুলো বাযুঃ সকলঃ সর্বলোচনঃ ।

তলস্তালঃ করস্থালী ঊর্ধ্বসংহননো মহান্ ॥ ১০০॥

ছত্রং সুচ্ছত্রো বিখ্যাতো লোকঃ সর্বাশ্রযঃ ক্রমঃ ।

মুণ্ডো বিরূপো বিকৃতো দণ্ডী কুণ্ডী বিকুর্বণঃ ॥ ১০১॥

হর্যক্ষঃ ককুভো বজ্রী শতজিহ্বঃ সহস্রপাত্ ।

সহস্রমূর্ধা দেবেন্দ্রঃ সর্বদেবমযো গুরুঃ ॥ ১০২॥

সহস্রবাহুঃ সর্বাংগঃ শরণ্যঃ সর্বলোককৃত্ ।

পবিত্রং ত্রিককুন্মন্ত্রঃ কনিষ্ঠঃ কৃষ্ণপিংগলঃ ॥ ১০৩॥

ব্রহ্মদণ্ডবিনির্মাতা শতঘ্নীপাশশক্তিমান্ ।

পদ্মগর্ভো মহাগর্ভো ব্রহ্মগর্ভো জলোদ্ভবঃ ॥ ১০৪॥

গভস্তির্ব্রহ্মকৃদ্ ব্রহ্মী ব্রহ্মবিদ্ ব্রাহ্মণো গতিঃ ।

অনন্তরূপো নৈকাত্মা তিগ্মতেজাঃ স্বযংভুবঃ ॥ ১০৫॥

ঊর্ধ্বগাত্মা পশুপতির্বাতরংহা মনোজবঃ ।

চন্দনী পদ্মনালাগ্রঃ সুরভ্যুত্তরণো নরঃ ॥ ১০৬॥

কর্ণিকারমহাস্রগ্বী নীলমৌলিঃ পিনাকধৃত্ ।

উমাপতিরুমাকান্তো জাহ্নবীধৃগুমাধবঃ ॥ ১০৭॥

বরো বরাহো বরদো বরেণ্যঃ সুমহাস্বনঃ ।

মহাপ্রসাদো দমনঃ শত্রুহা শ্বেতপিংগলঃ ॥ ১০৮॥

প্রীতাত্মা পরমাত্মা চ প্রযতাত্মা প্রধানধৃত্ ।

সর্বপার্শ্বমুখস্ত্র্যক্ষো ধর্মসাধারণো বরঃ ॥ ১০৯॥

চরাচরাত্মা সূক্ষ্মাত্মা অমৃতো গোবৃষেশ্বরঃ ।

সাধ্যর্ষির্বসুরাদিত্যো বিবস্বান্ সবিতাঽমৃতঃ ॥ ১১০॥

ব্যাসঃ সর্গঃ সুসংক্ষেপো বিস্তরঃ পর্যযো নরঃ ।

ঋতুঃ সংবৎসরো মাসঃ পক্ষঃ সংখ্যাসমাপনঃ ॥ ১১১॥

কলা কাষ্ঠা লবা মাত্রা মুহূর্তাহঃ ক্ষপাঃ ক্ষণাঃ ।

বিশ্বক্ষেত্রং প্রজাবীজং লিংগমাদ্যস্তু নির্গমঃ ॥ ১১২॥

সদসদ্ব্যক্তমব্যক্তং পিতা মাতা পিতামহঃ ।
স্বর্গদ্বারং প্রজাদ্বারং মোক্ষদ্বারং ত্রিবিষ্টপম্ ॥ ১১৩॥

নির্বাণং হ্লাদনশ্চৈব ব্রহ্মলোকঃ পরাগতিঃ ।
দেবাসুরবিনির্মাতা দেবাসুরপরায়ণঃ ॥ ১১৪॥

দেবাসুরগুরুর্দেবো দেবাসুরনমস্কৃতঃ ।
দেবাসুরমহামাত্রো দেবাসুরগণাশ্রয়ঃ ॥ ১১৫॥

দেবাসুরগণাধ্যক্ষো দেবাসুরগণাগ্রণীঃ ।
দেবাতিদেবো দেবর্ষির্দেবাসুরবরপ্রদঃ ॥ ১১৬॥

দেবাসুরেশ্বরো বিশ্বো দেবাসুরমহেশ্বরঃ ।
সর্বদেবময়োঽচিন্ত্যো দেবতাত্মাঽঽত্মসংভবঃ ॥ ১১৭॥

উদ্ভিদ্ত্রিবিক্রমো বৈদ্যো বিরজো নীরজোঽমরঃ ।
ঈড্যো হস্তীশ্বরো ব্যাঘ্রো দেবসিংহো নরর্ষভঃ ॥ ১১৮॥

বিবুধোঽগ্রবরঃ সূক্ষ্মঃ সর্বদেবস্তপোময়ঃ ।
সুযুক্তঃ শোভনো বজ্রী প্রাসানাং প্রভবোঽব্যয়ঃ ॥ ১১৯॥

গুহঃ কান্তো নিজঃ সর্গঃ পবিত্রং সর্বপাবনঃ ।

শৃংগী শৃংগপ্রিয়ো বভ্রূ রাজরাজো নিরাময়ঃ ॥ ১২০॥

অভিরামঃ সুরগণো বিরামঃ সর্বসাধনঃ ।

ললাটাক্ষো বিশ্বদেবো হরিণো ব্রহ্মবর্চসঃ ॥ ১২১॥

স্থাবরাণাংপতিশ্চৈব নিয়মেন্দ্রিয়বর্ধনঃ ।

সিদ্ধার্থঃ সিদ্ধভূতার্থোঽচিন্ত্যঃ সত্যব্রতঃ শুচিঃ ॥ ১২২॥

ব্রতাধিপঃ পরং ব্রহ্ম ভক্তানাং পরমাগতিঃ ।

বিমুক্তো মুক্ততেজাশ্চ শ্রীমান্ শ্রীবর্ধনো জগত্ ॥ ১২৩॥

॥ শ্রীমান্ শ্রীবর্ধনো জগত্ ওঁ নম ইতি ॥

Reference: Shiva Sahasranama Stotram with Namavali and name-by-name

English

translation; by Swami Chidbhavananda; published by Sri Ramakrishna

Tapovanam, Tirupparaitturai

Updated and proofread by Kirk Wortman kirkwort at hotmail.com

Please send corrections to sanskrit@cheerful.com

Last updated ত্oday

Shiva Sahasranama Stotram ( Mahabharat ) Variation 1 Lyrics in Bengali PDF
% File name : shivasahasMaha.itx
% Category : sahasranAma
% Location : doc_shiva
% Author : Vyas
% Language : Sanskrit
% Subject : philosophy/hinduism/religion
% Transliterated by : Tokunaga
% Proofread by : Kirk Wortman kirkwort at hotmail.com
% Latest update : November 1, 2010
% Send corrections to : Sanskrit@cheerful.com
% Site access : http://sanskritdocuments.org
%
% This text is prepared by volunteers and is to be used for personal study
% and research. The file is not to be copied or reposted for promotion of
% any website or individuals or for commercial purpose without permission.
% Please help to maintain respect for volunteer spirit.
%

We acknowledge well-meaning volunteers for Sanskritdocuments.org and other sites to have built the collection of Sanskrit texts.
Please check their sites later for improved versions of the texts.
This file should strictly be kept for personal use.
PDF file is generated [ October 12, 2015 ] at Stotram Website